UGC - CARE LISTED

ISSN: 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

# शोध-प्रभा

(A Reffered & Peer-Reviewed Quarterly Research Journal)

Vol. 48 प्रदम अंक No.03 : 2023

प्रधानसम्पादकः
प्रो.मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो.शिवशङ्करमिश्रः

सहसम्पादकः
डॉ.ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
केन्द्रीयविश्वविद्यालयः
नवदेहली-16

ISSN: 0974-8946
शोध प्रभा Vol. 48, प्रदम अंक, Book No.03: 2023
Shodha Prabha (UGC CARE Journal)

# पतञ्जलिसम्मतः शब्दस्वरूपः स्फोटवादश्च

**विश्वजित-पाखिरा** सहकारी अध्यापकः(विभागीयप्रधानः), धनियाखालि शरत् सेन्टिनारी महाविद्यालयः
(biswajitpakhira@gmail.com)

शब्दतत्त्वविषये आलोचना प्राचीनभारते वैदिकयुगतः प्रचलिता। वेदस्य विविधसूक्ते, ब्राह्मणग्रन्थसमूहे, व्याकरणादि वेदाङ्गे, प्रातिशाख्ये, वैदिके च अवैदिके दार्शनिकप्रस्थाने शब्दत्त्वस्य विविधविषयं स्वीकृत्य वेचित्र्यपूर्णालोचनायाः प्रभूतनिदर्शनं आधुनिकभाषातत्त्वविदसम्प्रये विस्मयमिश्रितं प्रशस्तिं लभते। शब्दविद्यायाः सुदीर्घे इतिहासे श्रेष्ठासनं लब्धवान् महाभाष्यकारपतञ्जलिः ।पाणिनिकात्यायनव्याड्यादिनां पूर्वाचार्यानां ग्रन्थसमुहानां आश्रयकृतेन आर्चयेन पतञ्जलिना तस्य शब्दतत्त्वविषयकः अतिगम्भीरः दुरुहदार्शनिकविचारमण्डितः 'महाभाष्यम्' इति ग्रन्थः विरचितः । शब्दतत्त्वस्फोटविषये समीक्षा एव अस्य निवन्धस्य विषयः। आलोचनापूर्वे उक्तं आलोच्य N विशदरूपे समाधातुम - सास्नालाङ्गलककुदखुरविषाणेत्यादीनि द्रवाणि गोशब्दस्य वाच्यानि न भवन्ति। यदि तथा स्यात् तर्हि 'गोः सास्नालाङ्गुलादि' इति भेदाग्राही अनुभवसिद्धः व्यावहारः असम्भवः एव। अतः द्रवं गोशब्दस्यार्थः न । एवं गोः गमनशयनादि क्रियापि गोशब्दस्य अर्थः न । अन्यथा गो गमनशयनादि भेदप्रतियोगि अर्थ न स्यात्। अतः गोशब्दः क्रियावाचकः न। पुनः श्वेतकृष्णलोहितादि गुणाः गो शब्दस्य अभिधेयः न। यतो हि गोः श्वेतकृष्णादि गुणरूपे प्रसिद्धत्वात् उभयोः भेदः अनुभावसिद्धः। तथैव गोत्वंरूपं सामान्यं वा जातिः 'गो' शब्दस्यार्थः नास्ति। यतो गोः गोत्वम् असाधारणधर्म एवं सर्वसिद्धव्यावहारः उभयोः भेदस्य प्रयोजकः। यदि सामान्यमेव गोशब्दस्यार्थः तर्हि गोत्वमेव गौ इति व्यवहार स्यात्। एवं द्रव्यं वा गुन वा क्रिया वा 'गो' शब्दस्यार्थः तर्हि सास्नादि गौः, श्वेतकृष्णादि गौः, गमनादि गौः इति व्यावहारः स्यात्।

परन्तु एवं व्यावहारः कुत्रापि नास्ति। गौः द्रवस्य वाचकः न, अतः सास्नादि गोशब्दस्य वाच्यः न।अतः द्रव्यगुणक्रियासामान्यम् किमपि पृथकरुपे शब्दस्यार्थः न भवति। भाष्यकारस्य एवं गोशब्दस्यार्थः स्वीकारे आशङ्का भवेत्येव । अतः शङ्कायाः समाधायन् आह महामुनिपतञ्जलिः-

**' येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः'।**[1]

अभिव्यङ्गं स्फोटः एव शब्दः इति ध्वनितः। स्फोटाख्यः शब्दः एव अर्थस्य वाचकः। स्फोटः नित्यशब्दः, स अनादिनिधनः अर्थात् उत्पत्तिविनाशरहितः। स्फोटः स्वप्रकाशः च सर्वव्यापि। वैयाकरणमतानुसारेण स्फोटोख्यः शब्द एव जगतः स्रष्टा। जगऽस्रष्टा निरावयवः अविकृतस्वरूपः परानिष्ठितः भूत्वा जगऽरूपं भूतवान्। एष एव शब्दब्रह्मनः विवर्त। तथैव वाक्यपदीयकारः -

**"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।**[2] **इति**

---

[1] दण्डिस्वामी, दामोदर-आश्रम, पतञ्जल महाभाष्य (पस्पशाह्निक), १४१७ वङ्गाव्द, पृः १४